# Shri Ganapati Talam

# શ્રીગણપતિતાલમ્

## Document Information

Text title : gaNapatitAlam

File name : gaNapatitAlam.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com, PSA Easwaran

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran

Latest update : March 17, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Shri Ganapati Talam

# શ્રીગણપતિતાલમ્

(તત્પુરુષાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ
તન્નો દન્તિઃ પ્રચોદયાત્ ॥)

વિકટોત્કટસુન્દરદન્તિમુખં
ભુજગેન્દ્રસુસર્પગદાભરણમ્ ।
ગજનીલગજેન્દ્રગણાધિપતિં
પ્રણતોઽસ્મિ વિનાયકહસ્તિમુખમ્ ॥ ૧॥

સુરસુરગણપતિસુન્દરકેશં
ઋષિઋષિગણપતિયજ્ઞસમાનમ્ ।
ભવભવગણપતિપદ્મશરીરં
જયજય ગણપતિ દિવ્ય નમસ્તે ॥ ૨॥

ગજમુખવક્ત્રં ગિરિજાપુત્રં ગણગુણમિત્રં ગણપતિમીશપ્રિયમ્ ॥ ૩॥

કરધૃતપરશું કઙ્કણપાણિં કબલિતપદ્મરુચિમ્ ।
સુરપતિવન્દ્યં સુન્દરવક્ત્રં સુન્દરચિતમણિમકુટમ્ ॥ ૪॥

પ્રણમતદેહં પ્રકટિતકાલં ષષ્ઠિરિ તાલમિદં
તત્તત્ષષ્ઠિરિ તાલમિદં તત્તત્ષષ્ઠિરિ તાલમિદમ્ ॥ ૫॥

લમ્બોદરવરકુઞ્જાસુરકૃતકુઙ્કુમવર્ણધરમ્ ।
શ્વેતસશૃઙ્ગં મોદકહસ્તં પ્રીતિ સપનસફલમ્ ॥ ૬॥

નયનત્રયવરનાગવિભૂષિતનાનાગણપતિ તં તત્તક્
નયનત્રયવરનાગવિભૂષિતનાનાગણપતિ તં તત્તક્
નાનાગણપતિ તં, તત્તક્ નાનાગણપતિ તં તત્તક્ નાનાગણપતિ તમ્ ॥ ૭॥

ધવલિતજલધરધવલિતચન્દ્રં
ફણિમણિકિરણવિભૂષિતખડ્ગમ્ ।
તનુતનુવિષહરશૂલકપાલં

હરહરશિવશિવગણપતિમભયમ્ ॥ ૮॥

કટતટવિગલિતમદજલજલધિતગણપતિવાદ્યમિદં
કટતટવિગલિતમદજલજલધિતગણપતિવાદ્યમિદં
તત્તત્ ગણપતિવાદ્યમિદં, તત્તત્ ગણપતિવાદ્યમિદમ્ ॥ ૯॥

તત્ગદિં નં તરિગુ તરિજનકુ કુકુત્તદ્દિ કુકુતકિટ ડિંડિંગુ ડિગુનકુકુતદ્દિ
તત્ત ઝં ઝં તરિત ! ત ઝં ઝં તરિત તકતઝં ઝં તરિત ।
ત ઝંઝં તરિત તરિદણત તરજુણુત જુણુદિમિ ટકટદિકુતરિગિટતોં
ટકિ ટકટદિકુતરિગિટતોં ટકિ ટકુદિકુતરિગિટતોં તામ્ ॥ ૧૦॥

તક-તકિટ-તકતકિટ-તક-તકિટતતોં,
શશિકલિતશશિકલિતમૌલિનં શૂલિનમ્ ।
તક-તકિટ-તક-તકિટ-તક-તકિટ-તત્તોમ્,
વિમલશુભકમલજલપાદુકં પાણિનમ્ ।
ધિક્તકિટ-ધિક્તકિટ-ધિક્તકિટતત્તોં,
પ્રમથગણગુણખચિતશોભનં શોભિતમ્ ।
ધિક્તકિટ-ધિક્તકિટ-ધિક્તકિટતત્તોં,
મૃદુલભુજસરસિજભિપાનકં પોષણમ્ ।
ધકતકિટ-થકતકિટ-થકતકિટતત્તોં,
પનસફલકદલિફલમોદનં મોદકમ્ ।
ધિક્તકિટ-ધિક્તકિટ-ધિક્તકિટતત્તોં,
પ્રમથગુરુશિવતનયગણપતિ તાલનમ્ ।
ગણપતિ તાલનં ! ગણપતિ તાલનમ્ !! ॥ ૧૧॥

ઇતિ ગણપતિતાલં સમ્પૂર્ણમ્ ।

Some renderings start with the following two verses,
then the Gayatri, followed by the main vikaTotkaTa onwards.
(અગણિતફણિફણમણિગણકિરણૈ
રરુનિતનિજલનુરવિધધવદન ।
ઘટઘટલુટઘલિકુલકલવિનદો
ગણપતિરઘમતમિહદિશતનુઃ ॥

લમ્બોદરવરકુઞ્જાવસ્થિતકુઙ્કુમવર્ણધરં
શ્વેતશ‍ૃઙ્ગં બીનસુહસ્તં પ્રીતિ સપનસફલમ્ ।

નાગત્રયયુતનાગવિભૂષણ નાનાગણપતિ તન્તતં
નાનાગણપતિ તન્તતં નાનાગણપતિ તન્તતમ્ ॥)

Encoded and proofread by Malleswara Rao Yellapragada malleswararaoy at yahoo.com and PSA Easwaran

*Shri Ganapati Talam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*